श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

परमहंस परिव्राजकाचार्य श्रीमुष्णं आण्डवन् श्रीरङ्गरामानुजयति अनुगृहीतं

# ॥ वीराचल श्रीरामचन्द्र सुप्रभातम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ वीराचल श्रीरामचन्द्र सुप्रभातम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

कौसल्यासुप्रजाराम पूर्वा सन्ध्या प्रवर्तते।
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम्॥ १॥

उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठ गरुडध्वज।
उत्तिष्ठ कमलाकान्त त्रैलोक्यं मङ्गलं कुरु॥ २॥

हे अम्ब सर्वजगतां हितमोददात्रि
विश्वग्विबोध हृदये विबुधेन्द्रवन्द्ये।
प्रग्वि प्रभोरनुमते प्रगुणैकताने
वीराद्रिनाथदयिते तव सुप्रभातम्॥ ३॥

भक्तार्तिभञ्जनपरे परलोकदात्रि
मुक्तानुभाव्यमहिमे मुनिनुत्यशीले।
कञ्जप्रभादवदने कमलायताक्षि
सीते शिवेशदयिते तव सुप्रभातम्॥ ४॥

श्रुत्यन्तसिद्धसुभगौ शुभमूर्तिमन्तौ
लीलागृहीतवपुषौ ललिताङ्घ्रिपद्मौ।
आद्यन्तशून्यनिखिलागम दम्पती वां
द्रागद्य हृद्यशुभदं सुखसुप्रभातम्॥ ५॥

श्रीरामराम करुणालय दिव्यशार्ङ्गिन्
सद्यो विनम्र जनता शरणप्रदायिन्।

www.prapatti.com

सन्नद्ध दानव मदप्रकर प्रमापिन्
    वीराद्रिराघवविभो तव सुप्रभातम्॥ ६ ॥

राकानिशाकर तिरस्कृतिदक्षवक्त्र
    पाकारिजादिभयद द्युमणिप्रभाव।
नाकादिलोकजनताविनताङ्घ्रियुग्म
    वीराद्रिराघवविभो तव सुप्रभातम्॥ ७ ॥

विश्वम्भरा वसुमती विमलाग्रगण्या
    वेषं पुपोष सुरभेर्भवदीक्षणाय।
वेदास्स्तुवन्ति भवतो विविधां हि लीलाम्
    वीराद्रिराघवविभो तव सुप्रभातम्॥ ८ ॥

उत्तुङ्ग मङ्गल शिखा लसदुत्तमाङ्गो
    गङ्गानुषङ्ग विलसत् स्वजटामृगाङ्कः।
अन्ये च निन्युरधिकं शुभवस्तुसङ्घं
    वीराद्रिराघवविभो तव सुप्रभातम्॥ ९ ॥

श्रीकौशिकादिमुनयश्शिवधातृमुख्याः
    प्रेमानुविद्धहृदयाः प्रसमाप्य सन्ध्याम्।
आयान्ति मुक्तिरतयो हृदयप्रसूनैः
    वीराद्रिराघवविभो तव सुप्रभातम्॥ १० ॥

नन्दिस्तु नारदगतिं प्रवलम्ब्य तुङ्गो
    मार्दङ्गिको भवति ते महितार्चनायै।
ऊरूद्भवादि गणिकाः कलयन्ति लास्यं
    वीराद्रिराघवविभो तव सुप्रभातम्॥ ११ ॥

माध्वीकपानमनसो मधुर प्रलापाः
    कीरास्समेत्य नियताः क्रमशस्स्थितास्ते।
श्रीतोरणस्रजि शुभां रचयन्ति नित्यं
    वीराद्रिराघवविभो तव सुप्रभातम्॥ १२ ॥



www.prapatti.com

लक्ष्मीकटाक्षनिकटे परिवर्तनात्ते
लब्धोरुनीलगुणका लघुपत्रभृङ्गाः।
शृङ्गार योनि नियमान्निभृतं स्वनन्ति
वीराद्रिराघवविभो तव सुप्रभातम्॥ १३॥

मन्दानिलोऽयममराधिपनन्दनस्थान्
मन्दार कुन्दनिवहान्मकरन्दगन्धान्।
बृन्दारकारि विजयिन्वहति प्रणम्रो
वीराद्रिराघवविभो तव सुप्रभातम्॥ १४॥

प्राद्यास्त्रयः प्रहृदयाः हरिचित्ततत्त्व
श्रीभक्तिसार शठजित्परकालमुख्याः।
तिष्ठन्ति दास्यरतयो यतिराजवर्याः
वीराद्रिराघवविभो तव सुप्रभातम्॥ १५॥

श्रीरङ्गपूतजगति श्रित रक्षणाय
स्वीकृत्य वेषममुकं दशधा विभिन्नम्।
लक्ष्म्यावतेरिथ निजाभिमतानुशक्त्या
वीराद्रिराघवविभो तव सुप्रभातम्॥ १६॥

मानमेय सङ्ग्रहं ह्यमानमीनतां गतस्तद्
दानव प्रदूषितन्त्वदाश्च वेदमादरात्त्वम्।
अब्जयोनये तुरङ्ग रूप कन्धर प्रभोद्राग्
वीरशैल धामराम तेऽस्तु चारु सुप्रभातम्॥ १७॥

धराधरोऽधरीकृतो हि नस्सुधा मुधा भवेद्
दितेस्तथाऽदितेस्सुतेषु शून्यहृत्सु शोभितम्।
दयापरोऽदधास्त्वमच्छकच्छपीयमाश्वहो
नतोऽस्मि वीरशैल राम सुप्रभातमस्तु ते॥ १८॥

भूतजातगर्भिणीन्तु जातु यातुघातुकस्स
मोदमान मानसः प्रगृह्य लीन एव सिन्धौ।

भूमिदार भूमिदाररूपिणा प्रतिष्ठिता सा
वीरशैल धामराम तेऽस्तु चारु सुप्रभातम्॥ १९ ॥

प्रलोल कुन्तलं शिशुन्तु भक्तितन्त्र यन्त्रितं
विभीषयंस्थितो हि तस्य दारणाय कैसरम्।
सरोषवेषमञ्जसा पुपोषिथ स्वयं पुरा
नतोऽस्मि वीरशैलराम सुप्रभातमस्तु ते॥ २० ॥

जगत्त्रयं पदत्रयेण माति केशवस्स्वयम्
ततोऽनृणो भवाम्यहन्विति व्यचिन्तयद्बलिः।
त्रिविक्रम त्वमस्य गर्वतक्षणं तदाऽकरोः
नतोऽस्मि वीरशैलराम सुप्रभातमस्तु ते॥ २१ ॥

दुष्टवीर्यगर्विधृष्ट भूपवर्ग पाटनं वै
तुष्टहृत्पुरा चकर्थ सप्त सप्त सप्तवारम्।
त्वं कुठारधारयैव रोषराम एव भूत्वा
वीरशैल धामराम तेऽस्तु चारु सुप्रभातम्॥ २२ ॥

प्रपन्न रक्षण प्रदीक्ष पङ्क्ति कण्ठतक्षक
स्वहस्तकर्तृणप्रयोग सूचितात्मतत्त्व भोः।
सुधर्मकर्ममूलकन्द दुष्प्रमेयपात्रधृङ्
नतोऽस्मि वीरशैल राम सुप्रभातमस्तु ते॥ २३ ॥

कोपलाङ्गलोग्रधाटि नम्रहस्तिपत्तनस्य
यामुनादि शिक्षणप्रलोल केलि मानसस्य।
बन्धुबृन्दनाशनेन त्यक्तयुद्धकौतुकस्य
वीरशैल धाम राम तेऽस्तु चारु सुप्रभातम्॥ २४ ॥

व्रजाङ्गनाभिवेष्टितोऽपि यस्स्वयं निरञ्जनो
धनञ्जयापदेशलोकदुग्धगीति निर्झरः।
निहीनभृत्यतादिराजधर्मकर्मकारिणो
नतोऽस्मि वीरशैलराम सुप्रभातमस्तु ते॥ २५ ॥



www.prapatti.com

संस्कृतिं विहाय सर्व धर्म मार्गदूषकान्वै
सप्तितल्लज प्रसादि सुन्दरः कृपाण पाणिः।
भाविकल्किचारुवेष तिष्यजान्हनिष्यसि त्वं
वीरशैल धामराम तेऽस्तु चारु सुप्रभातम्॥ २६ ॥

पातुं हि पापधिषणानभवः परेश
कालप्रदेशकरण प्रविदूर सत्वान्।
अर्चावतारविभवानुगृहीतबुद्धिः
वीराद्रिराघवविभो तव सुप्रभातम्॥ २७ ॥

सिद्धाः प्रसिद्धविभवाः शुभसाध्यसङ्घाः
भक्ता हि रक्तहृदयाः पितरस्समेताः।
मुक्ताश्च नित्यविमला मुनिसार्वभौमाः
वीराद्रिराघवविभो तव सुप्रभातम्॥ २८ ॥

प्राप्योऽपि यो हि जगतां सदुपायशेषी
भक्ति प्रपत्तिसुलभः परतत्त्वरूपः।
लक्ष्म्या तया करुणया च निषेवमाणः
वीराद्रिराघवविभो तव सुप्रभातम्॥ २९ ॥

सुप्रभातमिदं पुण्यं यः पठेत् शृणुयादपि।
सुप्रभातं भवेत्तस्य रामचन्द्रकृपाबलात्॥ ३० ॥

॥ इति वीराचल श्रीरामचन्द्र सुप्रभातं समाप्तम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥